श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीनारायणपण्डिताचार्य विरचिता

# ॥ श्रीनृसिंहस्तुतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीनृसिंहस्तुतिः ॥

उदयरवि सहस्रद्योतितं रूक्षवीक्षं
　　प्रलय जलधिनादं कल्पकृद्वह्नि वक्त्रम्।
सुरपतिरिपु वक्षश्छेद रक्तोक्षिताङ्गं
　　प्रणतभयहरं तं नारसिंहं नतोऽस्मि॥

प्रलयरवि करालाकार रुक्चक्रवालं
　　विरलय दुरुरोची रोचिताशान्तराल।
प्रतिभयतम कोपात्युत्कटोच्चाट्टहासिन्
　　दह दह नरसिंहासह्यवीर्याहितं मे॥ १ ॥

सरस रभस पादापात भाराभिराव
　　प्रचकितचल सप्तद्वन्द्व लोकस्तुतस्त्वम्।
रिपुरुधिर निषेकेणेव शोणाङ्घ्रिशालिन्
　　दह दह नरसिंहासह्यवीर्याहितं मे॥ २ ॥

तव घन घन घोषो घोरमाघ्राय जङ्घा
　　परिघमलघु मूरुव्याज तेजोगिरिं च।
घन विघटितमागाद्दैत्य जङ्घाल सङ्घो
　　दह दह नरसिंहासह्यवीर्याहितं मे॥ ३ ॥

कटकि कटक राजद्धाट काग्र्यस्थलाभा
　　प्रकट पटतटित्ते सत्कटिस्थातिपट्वी।
कटुक कटुक दुष्टाटोप दृष्टिप्रमुष्टौ
　　दह दह नरसिंहासह्यवीर्याहितं मे॥ ४ ॥

प्रखर नखर वज्रोत्खात रूक्षारिवक्षः
　　शिखरि शिखर रक्तैराक्तसन्दोह देह।

www.prapatti.com

सुवलिभ शुभ कुक्षे भद्र गंभीरनाभे
दह दह नरसिंहासह्यवीर्याहितं मे॥ ५ ॥

स्फुरयति तव साक्षात् सैव नक्षत्रमाला
क्षपित दितिज वक्षो व्याप्तनक्षत्रमार्गम्।
अरिदरधर जान्वासक्त हस्तद्वयाहो
दह दह नरसिंहासह्यवीर्याहितं मे॥ ६ ॥

कटुविकट सटौघोद्घट्टनाद्भ्रष्टभूयो
घनपटल विशालाकाश लब्धावकाशम्।
करपरिघ विमर्द प्रोद्यमं ध्यायतस्ते
दह दह नरसिंहासह्यवीर्याहितं मे॥ ७ ॥

हठलुठ दल घिष्टोत्कण्ठ दष्टोष्ठ विद्युत्
सट शठकठिनोरः पीठभित्सुष्ठु निष्ठाम्।
पठति नु तव कण्ठाधिष्ठ घोरान्त्रमाला
दह दह नरसिंहासह्यवीर्याहितं मे॥ ८ ॥

हृत बहुमिहि राभासह्यसंहाररंहो
हुतवह बहुहेति ह्रेपिकानन्त हेति।
अहित विहित मोहं संवहन् सैंहमास्यं
दह दह नरसिंहासह्यवीर्याहितं मे॥ ९ ॥

गुरुगुरुगिरिराजत्कन्दरान्तर्गतेवा
दिनमणि मणिशृङ्गे वान्तवह्निप्रदीप्ते।
दधदति कटुदंष्ट्रे भीषणोज्जिह्व वक्त्रे
दह दह नरसिंहासह्यवीर्याहितं मे॥ १० ॥

अधरित विबुधाब्धि ध्यानधैर्यं विदीध्य-
द्विविध विबुधधी श्रद्धापितेन्द्रारिनाशम्।
विदधदति कटाहोद्घट्टनेद्धाट्टहासं
दह दह नरसिंहासह्यवीर्याहितं मे॥ ११ ॥

त्रिभुवन तृणमात्र त्राण तृष्णं तु नेत्र-
त्रयमति लघितार्चिर्विष्ट पाविष्टपादम्।
नवतर रवि ताम्रं धारयन् रूक्षवीक्षं
दह दह नरसिंहासह्यवीर्याहितं मे॥ १२ ॥

भ्रमद भिभव भूभृद्भूरिभूभारसद्भिद्-
भिदभिनव विदभ्र विभ्र मादभ्र शुभ्र।
ऋभुभव भय भेत्तर्भासि भो भो विभोऽभिः
दह दह नरसिंहासह्यवीर्याहितं मे॥ १३ ॥

श्रवण खचित चञ्चत्कुण्ड लोच्चण्डगण्ड
भ्रुकुटि कटुललाट श्रेष्ठनासारुणोष्ठ।
वरद सुरद राजत्केसरोत्सारि तारे
दह दह नरसिंहासह्यवीर्याहितं मे॥ १४ ॥

प्रविकच कचराजद्रत्न कोटीरशालिन्
गलगत गलदुस्रोदार रत्नाङ्गदाढ्य।
कनक कटक काञ्ची शिञ्जिनी मुद्रिकावन्
दह दह नरसिंहासह्यवीर्याहितं मे॥ १५ ॥

अरिदरमसि खेटौ बाणचापे गदां सन्-
मुसलमपि कराभ्यामङ्कुशं पाशवर्यम्।
करयुगल धृतान्त्रस्रग्विभिन्नारिवक्षो
दह दह नरसिंहासह्यवीर्याहितं मे॥ १६ ॥

चट चट चट दूरं मोहय भ्रामयारीन्
कडि कडि कडि कायं ज्वारय स्फोटयस्व।
जहि जहि जहि वेगं शात्रवं सानुबन्धं
दह दह नरसिंहासह्यवीर्याहितं मे॥ १७ ॥

विधिभव विबुधेश भ्रामकाग्नि स्फुलिङ्ग
प्रसवि विकट दंष्ट्रोज्जिह्ववक्त्र त्रिनेत्र।

कल कल कलकामं पाहिमां ते सुभक्तं
दह दह नरसिंहासह्यवीर्याहितं मे॥ १८ ॥

कुरु कुरु करुणां तां साङ्कुरां दैत्यपोते
दिश दिश विशदां मे शाश्वतीं देवदृष्टिम्।
जय जय जय मुर्तेऽनार्त जेतव्य पक्षं
दह दह नरसिंहासह्यवीर्याहितं मे॥ १९ ॥

स्तुतिरियमहितघ्नी सेवितानारसिंही
तनुरिवपरिशान्ता मालिनी साऽभितोऽलम्।
तदखिल गुरुमाग्र्य श्रीदरूपा लसद्भिः
सुनिय मनय कृत्यैः सद्गुणैर्नित्ययुक्ताः॥ २० ॥

लिकुच तिलकसूनुः सद्धितार्थानुसारी
नरहरि नुतिमेतां शत्रुसंहार हेतुम्।
अकृत सकल पापध्वंसिनीं यः पठेत्तां
व्रजति नृहरिलोकं कामलोभाद्यसक्तः॥ २१ ॥

॥ इति श्रीनृसिंहस्तुतिः संपूर्णा ॥

www.prapatti.com